© 2018 IJSRSET | Volume 4, Issue 7, March-April-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 603-607

# परिवारदृशा छात्रव्यवहारविचारः



**डॉ. नीलाभ तिवारी**
**असिस्टेन्ट प्रोफेसर,**
**श्रीसदाशिवपरिसर राष्ट्रियसंस्कृतसंस्थानम् पुरी परिसर, ओडीसा**



**डॉ. धर्मेन्द्र शर्मा**
**ग्राम . मुंगावली, तहसील . सीहोर, जिला . सीहोर, म.प्र.**

**शोधालेखसारः** – शिक्षायाः त्रिषु अभिकरणेषु आद्याभिकरणपरिवारः छात्राय आश्रयेण सह जीवनसम्बद्धानिमूल्यानि संस्कारान् च प्रयच्छति। यानधिगम्य छात्रः जीवने पदे पदे स्वोन्नतिं साधयति। परिवारे वसतां सदस्यानां नित्यनैमित्तिकप्रभावः छात्रेषु उपजायते। अर्थात् यथा परिवारे पितराभ्याम् अभिभावकैः वा व्यवह्रियते तथैव गुण–दोषाः छात्रेऽपि समाविशन्ति। साम्प्रतिके युगे सर्वत्र छात्रव्यवहारसम्बद्धाः बह्व्यः समस्याः दरीदृश्यन्ते यथा– पितृणां व्यस्तता, प्राविधिकोपयन्त्राणां समयात् प्राक् अत्यधिकप्रयोगः, प्रतियोगितायाः भावः, संस्कारान् त्यज्य आधुनिकजीवनशैल्या जीवनयापनम् इत्यादयः समस्याः। एतासां समस्यानां मूले यन्निदानमस्ति तद् पितृणाम् अभिभावकानां च स्वबालकान् प्रति कर्त्तव्यबोधस्य अभावः विद्यते। अपि च एतासां समस्यानां निवारणाय परिवारस्य महती भूमिका विद्यते येन छात्रः साक्षात् जन्मनः सम्बद्धो भवति। छात्रः परिवारेण मूल्यानि आचरण–व्यवहारकुशलतां च प्राप्य अन्यस्मिन् स्थले व्यवहरति तेन समाजः प्रभावितो भवति समाजश्च राष्ट्रं प्रभावयति। अतः ध्यातव्यं यत् परिवारः छात्रस्य व्यवहारं निर्मीय समाजाय राष्ट्राय च सहयोगं प्रदातीति।

**मुख्यशब्दः** – गुण, दोषा, जन्मनः, समाजः, छात्रः, मनुष्यः, परिवारः।

---

## भूमिका

मानवस्वभावस्य व्यवहारेण सह सम्बन्धः शरीरात्मावत् वर्तते। मनुष्यः यदा किमपि न करोति तदापि तस्य कश्चन व्यवहारः प्रतीयते हि। पृथिव्यां समेषां मानवानां व्यक्तित्वं पृथक्–पृथक् भवति अतः सर्वत्र तेषां व्यवहारप्रदर्शनेऽपि वैविध्यम् अनुभूयते। परन्तु मुख्यरूपेण व्यवहारः द्विधा भवति यथा– साधुः असाधुश्च। व्यवहारः जनानां मनसा बुद्ध्या च सञ्चाल्यते। कथ्यते यथा दुर्योधनेन स्वव्यवहारं–

**जानामि धर्मं न च मे प्रवृत्तिः, जानाम्यधर्मं न च मे निवृत्तिः।**
**केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि।।**[1]

व्यवहारस्य अस्तित्ववशादेव पृथग्रूपेण मनोविज्ञानमिति विषयः विवर्तमाने संस्थापितः। अपि च प्रोक्तं विद्वद्भिः व्यवहारस्य विज्ञानमेव मनोविज्ञानमिति। शिक्षामनोविज्ञानस्य क्षेत्रे प्रतिदिनं मनोवैज्ञानिकैः अनुसन्धानानि क्रियन्ते। अनुसन्धानानां कारणादेव साम्प्रतं बहवः शिक्षणविधयः शिक्षणसिद्धान्ताः

[1] www.sanskritdocuments.org/doc_gitaa/pandavgita -57

शिक्षणोपकरणानि च विकसितानि सन्ति। एतानि सर्वाणि मानवजीवनस्य विकासे साहाय्यन्ति। परन्तु नैतिकशिक्षायाः मुख्यं स्रोतः परिवारः एव विद्यते।

**माताभूमिः पुत्रोऽहं पृथिव्याः**[2] इति अथर्ववेदवाक्यं मानवस्य सार्वभौमिककर्त्तव्यं निर्दिशति यत्र सः पृथिव्यां वसतः प्राणिनः प्रति स्वदायित्वं निर्वहति। मनुष्याणां समूहः समाजः औपचारिकाभिकरणेन परिवारात् हि प्रादुर्भूतः। परिवारसदस्याः छात्रं साधुव्यवहाराय प्रेरयन्ति अपि च सर्वदा तस्य शुभं समीहन्ते। कश्चन् छात्रः यादृशोऽपि व्यवहारं प्रदर्शयति तस्य मूले सामाजिकाः तस्य परिवाराय श्रेयः वा दोषं ददते। यतो हि परिवारेण छात्रव्यवहारः निर्मीयते प्रयासाश्च साध्यन्ते। अतः सन्दर्भेऽस्मिन् विमर्शः क्रियते।

## उद्देश्यानि

1. परिवारसम्प्रत्ययस्य निरूपणम्।
2. व्यवहारसम्प्रत्ययस्य निरूपणम्।
3. परिवारदृशा छात्रहिताय व्यवहारनिरूपणम्।

## सम्बद्धसाहित्याध्ययनम्

**शर्मा गीता (2015–17)** [3] – शोधकर्ता अत्र सर्वकारीयासर्वकारीयविद्यालयानां छात्राणाम् आक्रामकव्यवहारे आर्थिकस्तरस्य प्रभावसम्बद्धासु समस्यासु अध्ययनम् अकरोत्। अत्र सर्वेक्षणशोधविधिः प्रयुक्तः न्यादर्शत्वेन 80 छात्राश्च चिताः। अत्र निष्कर्षः प्रतिपादितः यत् सर्वकारीयाविद्यालयीयच्छात्रासु असर्वकारीयविद्यालयीयच्छात्राणामपेक्षया आक्रामकव्यवहारः अधिकः लब्धः। यतोहि धनसम्बद्धसमस्यायाः कारणात् तासां काश्चन आवश्यकताः पूरिताः न भवन्ति अतो तासां व्यवहारः क्रूरताम् अवाप्नोति।

**त्रिपाठी मनीषकुमारः, सिंहःजयः (2016)** [4] – शोधपत्रेऽस्मिन् विद्यार्थिनां शैक्षणिकोपलब्धौ सामाजिकव्यवहारस्य प्रभावात् वर्तमानस्थितौ जायमानानां समस्यानां आकलनम् कृतम्। निगदितं च 72. 12ः प्रयोज्याः मन्वते यत् हाईस्कूलस्तरे विद्यार्थीनां सामाजिकव्यवहारः शैक्षणिकोपलब्धौ स्वीकारात्मकप्रभावं जनयति।

## परिवारदृशा छात्रव्यवहारविचारः

परिवारः इति शब्द संस्कृतभाषायाः **परि** उपसर्गपूर्वकम् **वृ** धातोः **घञ्** प्रत्यये कृते सति निष्पद्यते। एतस्मै आङ्गलभाषायां FAMILY इति शब्दः आचर्यते। **परिव्रियतेऽनेन** इति परिवारः। अयं समाजस्य तादृश एकको विद्यते यस्मिन् छात्राणां पालनपोषणं तु भूयते हि प्रत्युत् ततः एव ते उचितसंस्कारान् व्यवहारनिर्देशनं च प्राप्नुवन्ति। यैः छात्राः स्वकीयं जीवनं समाजानुकूलं निर्मातुं सर्वाङ्गीणविकासमवाप्तुं च समर्थाः भवन्ति। छात्राः गृहे व्याप्तसम्बन्धैः यथा अग्रजैः सह कथमाचरणीयं? कथम् अनुजैः सह आचरणीयं? कथं चान्यजनैः सह व्यवहारं कर्त्तव्यम् इति शिक्षामवाप्नोति। विना परिवारं मानवस्य समाजे सम्यग्गतिं कल्पितुमपि न शक्यते। परिवारे छात्रेभ्यः सम्बद्धाः विविधसम्बन्धधारिणः निवसन्ति यथा– माता–पिता–भ्राता–भगिनी–पितामह–पितामही–पितृव्यादयः। एतेषां व्यवहारस्य प्रभावः छात्रव्यवहारेषु निश्चप्रचं जायते हि। अतः व्यवहारदृशा परिवारः महत्त्वपूर्णः। परिवारस्य विषये भारतकोश–ज्ञान का हिन्दी महासागर इत्यस्मिनुल्लिखितं यत् **मुख्यतः परिवार के अन्तर्गत पति–पत्नी और उनके**

---

[2] अथर्ववेदः–12/1/12

[3] www-biyanigirlscollege-com>geeta

[4] International Journal of Advanced Educational Research] Vol-1( Issue 5 Pg n-& 48&50

**बच्चों का समूह माना जाता है, परन्तु विश्व के अधिकांश भागों में परिवार का अर्थ एक सम्मिलित रूप में निवास करने वाले रक्त सम्बन्धियों का वह समूह है जिसमें विवाह और दत्तक प्रथा (गोद लेना) द्वारा परिवार की स्वीकृति प्राप्त व्यक्ति भी सम्मिलित होते हैं।**[5]

व्यवहारोऽपि मानवस्य आनुषाङ्गिकसम्प्रत्ययः विद्यते यं सः सकलजीवने निर्वहति। व्यवहारेणैव कस्यचिद् जनस्य प्रभुत्वं तस्य वातावरणे निर्धारितं भवति। व्यवहारः इति शब्दः **वि, अव** चोपसर्गपूर्वकं **हृ** धातोः **घञ्** प्रत्यये कृते सिद्धो भवति। एतस्मै आङ्गलभाषायां BEHAVIOR CHARACTER DEMEANOR आदयः शब्दाः प्रयुज्यन्ते। व्यवहारसन्दर्भे उच्यते–

**न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।**
**व्यवहारेण मित्राणि जायन्ते रिपवस्तथा।।**[6]

मानवेभ्यः सद्व्यवहारकरणाय प्रेरणाय च बहवाः ग्रन्थाः सनातनसंस्कृत्यां संरचिताः सन्ति यथा– नीतिशतकम्, चाणक्यनीतिः, विदूरनीतिः, याज्ञवल्क्यस्मृतिः, मनुस्मृतिः चेत्यादयाः ये मानववजीवनमुपकुर्वन्ति। निश्चप्रचं मानवो हि खलु विवेकशीलप्राणी जगत्यस्मिन् यं तर्केण विर्तकेण प्रहस्तनेन च व्यवहारप्रदर्शनाय क्षमता प्रदत्ता भगवता। तस्मिन्नेव शक्तिरियं विद्यते यत् किं करणीयम्? किं न करणीयम्? एतादृशी क्षमता भगवता श्रीकृष्णेनापि परिभाषिता श्रीमद्भगवद्गीतायाम्

**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।**
**बन्धं मोक्षं च या वेत्ति बुद्धि सा पार्थ सात्विकी।।**[7]

एवमेव भगवता श्रीकृष्णेन मानवव्यवहारस्य वाहिकायाः बुद्धेः राजसिक–तामसिकभेदौ व्यवहारानुगुणम् अप्युद्घाटितौ।

छात्राः नित्यं प्रति स्वस्य परिवारजनैः किमपि जीवनसम्बद्धज्ञानं गृहणन्ति। परिवारजनाः यथा नित्यं व्यवहरन्ति तथैव छात्रेष्वपि प्रभावः उपजायते। साधुव्यवहारस्य साधु, असाधुव्यवहारस्य च असाधुप्रभावः नास्त्यत्र कश्चन सन्देहः। अतो परिवारे गृहसदस्येषु प्रेम्णः सोहार्द्रतायाः च भावः भवितव्यः। तेषु परस्परद्वेषस्याभावो भवेत् अपि च तेषां मनसि सर्वेभ्यः सदस्येभ्यः भावना कल्याणाश्रिता भवतु सर्वं मङ्गलानि सन्तु च एतदर्थम् अथर्ववेदे काम्यते यथा

**मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।**
**अन्यो अन्योभिः हर्यतः वत्सं जातमिवाहन्या।।**[8]

जगदिदं परिवर्तमानं वर्तते यत्र देशकालपरिस्थितिवशात् नित्यं मानसिक–भौतिक–सामाजिकप्रभृतीनि परिवर्तनानि जायन्ते। अधुना समाजे परिवारस्य द्वेप्रणाल्यौ व्याप्ते स्तः संयुक्तपरिवारप्रणाली एकलपरिवारप्रणाली च।

---

5 bharatdiscovery-org भारतकोश– ज्ञान का हिन्दी महासागर,

6 हितोपदेशः,मित्रलाभः 71

7 श्रीमद्भगवद्गीता 18/30

8 अथर्ववेदः – 3/30/3

**एकलपरिवारप्रणाली–** एकलपरिवारे छात्राणां ये मुख्यसम्बन्धिनः निवसन्ति तेषु माता, पिता, भ्राता, भगिनी, पितामहः पितामही च वसन्ति। एतादृशः परिवारः जगति आङ्लभाषायां NUCLEAR FAMILY इति नाम्ना ख्यायते।

**संयुक्तपरिवारप्रणाली–** संयुक्तपरिवारे छात्राणां ये सम्बन्धिनः निवसन्ति तेषु माता, पिता, भ्राता, भ्रातृजाया, भगिनी, पितामहः, पितामही, पितृव्यः पितृव्या पितृस्वसा चेत्यादयः वसन्ति। ईदृशो परिवारः JOINT FAMILY इति कथ्यते।

प्राक्काले मानवः संयुक्तपरिवारे हि वसन् आसीत्परं शनैः शनैः औद्योगिकक्रान्तिवशाद् महार्घतायाः वृत्तिविहीनतायाः जनसंख्याविस्फोटस्य च कारणाद् प्रणाल्यामस्यां विघटनं जातं यदधुना एकलपरिवारप्रणालीरूपेण दरीदृश्यते। संयुक्तपरिवारे गृहसदस्यानां संख्याधिका भवति। नगराणाम् अपेक्षया ग्रामेषु जनाः संयुक्तपरिवारे अधिकतया वसन्ति।

परिवारसदस्यैः सन्ततीषु समाजे व्याप्तसंस्कृतेः हस्तान्तरणं विधीयते। छात्राणां लालनं पालनं विविधावश्यकतापूर्तिश्च अभिभावकैः सम्पाद्यन्ते। पित्रोः महत् किञ्चन ऋणं भवत्येव पुत्रपुत्रीषु येन ते उऋणं न भवितुं शक्नुवन्ति। यथोक्तम्

**यन्माता–पितरौ वृत्तं तनये कुरुतः सदा।**
**न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतम्।।**[9]

छात्रः विद्यालये समाजे वा विश्वे यत्र कुत्रापि व्यवहरति, याः काः अपि तस्य प्रवृत्तयः निर्मिताः भवन्ति। सः सदाचरति न वा, तेन सम्बद्धानां समेषां व्यवहाराणां दायित्त्वं परिवारस्य एव भवति। बालकस्य प्रथमगुरूः तस्य माता मन्यते। सैव तं प्रथमतया शिक्षयति अपि च जीवने सद्प्रेरणां यच्छति। महाभारते माता गुरुरूपा प्रोक्ता

**दशैव तु सदाचार्य श्रोत्रयानतिरिच्यते।**
**दशाचार्यनुपाध्यायः उपाध्यायान् पिता दश।**
**पितृन दश तु मातैका सर्वा वा पृथिवीमपि।**
**गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः।।**[10]

पाति रक्षति अपत्यं यः सः पिता। यतः पितैव सकलपरिवारं पालयति। परिवारे वसतां जनानाम् आवश्यकतानां पूर्तिं स एव पुष्णाति। अतः कथनस्य अवसर एव नास्ति यत् किं पितुर्महत्त्वं छात्राय। जगति प्रत्येकं पिता स्वकीयाकाङ्क्षाः निरूध्य पुत्र–पुत्र्योः स्वप्नानि पूरयति। पिता सर्वदा वाञ्छति यत् बाल्यकाले वा जीवने सर्वप्रकारकाणि सुखानि सः स्वसन्तत्यै दद्यात्। अतः तस्य महिमा छात्रजीवने अखण्डो वर्तते यथा निगदितम्।

**पिता धर्मः पिता स्वर्गः पिता हि परमं तपः।**
**पितरि प्रीतिमापन्ने सर्वा प्रीयन्ति देवताः।।**[11]

परिवारे छात्रः परिवारजनानां सानिध्ये बहु किमपि अधिगच्छति। छात्रस्य प्रवृत्तिषु परिवारसदस्यानां प्रभावो जायते एव। तस्मिन् जायमानाः संवेगाः अनुवांशिकतया वातावरणेन च विकसन्ति। अधिकांशतः किशोराणाम् अग्रजैः सह वा अग्रजाभिस्सह अन्तःक्रिया सुदृढा भूयते यस्मात् कारणात् ते यदा मनोकर्षणे

---

9 वाल्मीकिरामायणम् – 2/3/9
10 महाभारतम्, शान्तिपर्वः – 108/16–18
11 महाभारतम् –266/21

© 2018 IJSRSET | Volume 4, Issue 7, March-April-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 603-607

वा प्रसन्नतायाम् भवन्ति अवश्यमेव परिवारसदस्यैः सह विचारविनिमयं कुर्वन्ति। पितराभ्यां चाणक्यनीतौ निर्दिश्यते छात्रस्य पालनम् –

**लालयेत्पञ्चवर्षाणि दशवर्षाणि ताडयेत्।**
**प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्।।**[12]

छात्राणां सर्वाङ्गीणविकासस्य महनीयः आधारः शिक्षा वर्तते । शिक्षां विना बालानां सम्पूर्णजीवनं अंधकारस्य अङ्के स्वपिति। प्रतियोगितायाः अस्मिन् काले छात्राणां कृते शिक्षा महती आवश्यकी। तस्मादेव सर्वकारेणापि अनिवार्यशिक्षासम्बद्धः विधिः संस्थापितः। अतो पितराभ्यां बालेभ्यः शिक्षावसरः कल्पनीयः। उच्यते अपि व्यवहारिकनिदर्शनम्–

**माता रिपुः पिता शत्रुर्बालो याभ्यां न पाठ्यते।**
**सभामध्ये न शोभते, हंसमध्ये बको यथा।।**[13]

विना पितरौ कस्यचिद् जनस्य कल्पनामपि न कर्तुं शक्यते। अतो छात्राणां जीवने पारिवारिकसदस्याः महद् स्थानं भजन्ते। पद्मपुराणस्य अयं श्लोकः इत्थं पुष्णाति।

**पर्यट्य पृथिवीं सर्वां स्थानं पश्यामि तन्नहि।**
**यस्मिन्नवाप्यते भ्राता, जननी जनकोऽपि वा।।**[14]

सन्दर्भेऽस्मिन् कृतविमर्शेण ज्ञायते यत् छात्राणां जीवने परिवारः महद्स्थानं भजते। परिवारेणैव समाजः राष्ट्रश्च उन्नतिपथे अग्रसरति। कस्यचिद् राष्ट्रस्य मूले परिवारः खलु विराजते येन सः राष्ट्रः समृद्धिम् अवाप्य विकसति। परिवारस्य वातावरणं तथा वंशानुगतप्राप्तमूलप्रवृत्तयः छात्राणां जीवने योगं प्रयच्छन्ति। यथा परिवारे वातावरणं निर्मीयते परिवारजनैः व्यवह्रियते तथैव स्वभावः छात्राणां गृहस्य अन्ते बहिः च निर्मीयते अपि च ते व्यवहाराय प्रेरिताः भवन्ति। अतः समाजे परिवाररूपेण प्रचाल्यमाने एकके राष्ट्रस्य सर्वकारपक्षतः सामाजिकसंस्थापक्षतः स्वीकारात्मकतया अवधानं प्रदीय कार्याणि करणीयानि।

**सन्दर्भग्रन्थसूची**

काव्यतीर्थ, नारायण राम आचार्य (2011): सुभाषितरत्नभाण्डागारम्, चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली.
गोयल, प्रीतिप्रभा (2011): संस्कृत लोकोक्ति कोश, राजस्थानी ग्रन्थागार, जोधपुर.
पाठक, पी.डी (2012): भारतीय शिक्षा और उसकी समस्याएँ, अग्रवाल पब्लिकेशन्स, आगरा.
विद्यालंकार, सुभाष (2009): महाभारतसूक्तिसुधा, प्रतिभा प्रकाशन. दिल्ली.
शास्त्री, चक्रधर नौटियाल 'हंस'(2013): बृहद–अनुवाद–चन्द्रिका, मोतीलाल बनारसीदास, पटना
सिंह, अरूणकुमारः (2006): मनोविज्ञान समाजशास्त्र तथा शिक्षा में शोधविधियाँ, मोतीलाल बनारसीदास प्रकाशन, नई दिल्ली.
देव, राजा राधाकान्त (2002): शब्दकल्पद्रुमः, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली.
www-indisahityadarpan-in/chanakya&neeti&darpan]
www-biyanigirlscollege-com>geeta
www-archive-org

12 चाणक्यनीतिः–3/18
13 चाणक्यनीतिः– 2/11
14 पद्मपुराणम् – 63/14